# ॥ वाल्मीकि रामायण॥

## २ अयोध्याकाण्ड

### अध्याय ४४

विशालान्कोसलान्रम्यान्यात्वा लक्ष्मणपूर्वजः ।
आससाद महाबाहुः शृङ्गवेरपुरं प्रति ॥१॥

तत्र त्रिपथगां दिव्यां शिवतोयामशैवलाम् ।
ददर्श राघवो गङ्गां पुण्यामृषिनिसेविताम् ॥२॥

हंससारससङ्घुष्टां चक्रवाकोपकूजिताम् ।
शिंशुमरैश्च नक्रैश्च भुजङ्गैश्च निषेविताम् ॥३॥

तामूर्मिकलिलावर्तामन्ववेक्ष्य महारथः ।
सुमन्त्रमब्रवीत्सूतमिहैवाद्य वसामहे ॥४॥

अविदूरादयं नद्या बहुपुष्पप्रवालवान् ।
सुमहानिङ्गुदीवृक्षो वसामोऽत्रैव सारथे ॥५॥

लक्ष्णश्च सुमन्त्रश्च बाढमित्येव राघवम् ।
उक्त्वा तमिङ्गुदीवृक्षं तदोपययतुर्हयैः ॥६॥

रामोऽभियाय तं रम्यं वृक्षमिक्ष्वाकुनन्दनः ।
रथादवातरत्तस्मात्सभार्यः सहलक्ष्मणः ॥७॥

सुमन्त्रोऽप्यवतीर्यैव मोचयित्वा हयोत्तमान् ।
वृक्षमूलगतं राममुपतस्थे कृताञ्जलिः ॥८॥

तत्र राजा गुहो नाम रामस्यात्मसमः सखा ।
निषादजात्यो बलवान्स्थपतिश्चेति विश्रुतः ॥९॥

स श्रुत्वा पुरुषव्याघ्रं रामं विषयमागतम् ।
वृद्धैः परिवृतोऽमात्यैर्ज्ञातिभिश्चाप्युपागतः ॥१०॥

ततो निषादाधिपतिं दृष्ट्वा दूरादवस्थितम् ।
सह सौमित्रिणा रामः समागच्छद्गुहेन सः ॥११॥

तमार्तः सम्परिष्वज्य गुहो राघवमब्रवीत् ।
यथायोध्या तथेदं ते राम किं करवाणि ते ॥१२॥

ततो गुणवदन्नाद्यमुपादाय पृथग्विधम् ।
अर्घ्यं चोपानयत्क्षिप्रं वाक्यं चेदमुवाच ह ॥१३॥

स्वागतं ते महाबाहो तवेयमखिला मही ।
वयं प्रेष्या भवान्भर्ता साधु राज्यं प्रशाधि नः ॥१४॥

भक्ष्यं भोज्यं च पेयं च लेह्यं चेदमुपस्थितम् ।
शयनानि च मुख्यानि वाजिनां खादनं च ते ॥१५॥

गुहमेव ब्रुवाणं तं राघवः प्रत्युवाच ह ।
अर्चिताश्चैव हृष्टाश्च भवता सर्वथा वयम् ॥१६॥

पद्भ्यामभिगमाच्चैव स्नेहसन्दर्शनेन च ।
भुजाभ्यां साधुवृत्ताभ्यां पीडयन्वाक्यमब्रवीत् ॥१७॥

दिष्ट्या त्वां गुह पश्यामि अरोगं सह बान्धवैः ।
अपि ते कूशलं राष्ट्रे मित्रेषु च धनेषु च ॥१८॥

यत्त्विदं भवता किं चित्प्रीत्या समुपकल्पितम् ।
सर्वं तदनुजानामि न हि वर्ते प्रतिग्रहे ॥१९॥

कुशचीराजिनधरं फलमूलाशनं च माम् ।
विद्धि प्रणिहितं धर्मे तापसं वनगोचरम् ॥२०॥

अश्वानां खादनेनाहमर्थी नान्येन केन चित् ।
एतावतात्रभवता भविष्यामि सुपूजितः ॥२१॥

एते हि दयिता राज्ञः पितुर्दशरथस्य मे ।
एतैः सुविहितैरश्वैर्भविष्याम्यहमर्चितः ॥२२॥

अश्वानां प्रतिपानं च खादनं चैव सोऽन्वशात् ।
गुहस्तत्रैव पुरुषांस्त्वरितं दीयताम् इति ॥२३॥

ततश्चीरोत्तरासङ्गः सन्ध्यामन्वास्य पश्चिमाम् ।
जलमेवाददे भोज्यं लक्ष्मणेनाहृतं स्वयम् ॥२४॥

तस्य भूमौ शयानस्य पादौ प्रक्षाल्य लक्ष्मणः ।
सभार्यस्य ततोऽभ्येत्य तस्थौ वृक्षमुपाश्रितः ॥२५॥

गुहोऽपि सह सूतेन सौमित्रिमनुभाषयन् ।

अन्वजाग्रत्ततो राममप्रमत्तो धनुर्धरः ॥ २६॥

तथा शयानस्य ततोऽस्य धीमतो
यशस्विनो दाशरथेर्महात्मनः ।
अदृष्टदुःखस्य सुखोचितस्य सा
तदा व्यतीयाय चिरेण शर्वरी ॥ २७॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com